# .. shrii akkalakoTasvaamii kavacha stotram ..

## ॥ श्री अक्कलकोटस्वामी कवच स्तोत्रम् ॥

ॐ ।
अस्य श्री स्वामी कवच स्तोत्रमंत्रस्य ।
सुव्रत ऋषिः । अनुष्टुप् छंदः ।
स्वामी समर्थ देवता ।
शङ्करराजे शक्तिः ।
बाळाप्पा कीलकम् ।
मम सकलाभीष्टप्राप्त्यर्थं पाठे विनियोगः ।

।अथ करन्यासः ।

ॐ ह्रां अङ्गुष्ठाभ्यां नमः ॥
ॐ ह्रीं तर्जनीभ्यां नमः ॥
ॐ ह्रूं मध्यमाभ्यां नमः ॥
ॐ ह्रैं अनामिकाभ्यां नमः ॥
ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥
ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥

॥अथ षडङ्गन्यासः ॥

ॐ ह्रां हृदयाय नमः ॥
ॐ ह्रीं शिरसे स्वाहा ॥
ॐ ह्रूं शिखायै वषट् ॥
ॐ ह्रैं कवचाय हुं ॥
ॐ ह्रौं नेत्रत्रयाय वौषट् ॥
ॐ ह्रः अस्त्राय फट् ॥

॥अथ ध्यानम् ॥

भूमानंदं सहजसुखदं केवलं ब्रह्ममूर्तिम् ।
विश्वातीतं विमलहृदयं वेदवेदान्त वेद्यम् ॥१॥
शान्तं दान्तं सरलमनसं सर्वसामर्थ्यरूपम् ।
सर्वातीतं ह्यमरमचलं स्वामिनं तं नमामि ॥२॥
ॐ शीर्षं मे पातु स्वामी वै ।
भालं नेत्रे च सद्गुरुः ॥१॥
कण्ठं मुखञ्च पातु मे ।
स्वामीसमर्थ देशिकः ॥२॥
स्कन्धौ मे पातु स्वामी वै ।
बाहू पातु तु सद्गुरुः ॥३॥

करौ मे पातु स्वामी च ।
अङ्गुलयश्च देशिकः ॥ ४ ॥
प्रज्ञाप्राकारवासी वै ।
हृदयं पातु मे सदा ॥ ५ ॥
उरः स्थलञ्च स्वामी वै ।
कटिं मध्यं हि सद्गुरुः ॥ ६ ॥
नाभिं जङ्घे च स्वामी वै ।
गुह्यं पातु च देशिकः ॥ ७ ॥
ऊरू जानु समर्थश्च ।
पादौ स्वामी च पातु मे ॥ ८ ॥
देहं मनश्च प्रज्ञाञ्च ।
प्रज्ञापुरस्थितः सदा ॥ ९ ॥
दशदिक्षु स पातु मां ।
स्वामीसमर्थ सद्गुरुः ॥ १० ॥
उत्पातान्त्रिविधान्नित्यं ।
नष्टान् कुर्वन्तु सद्गुरुः ॥ ११ ॥
संकटानाधिव्याधींश्च ।
नश्यन्तु देशिकः सदा ॥ १२ ॥
नानापीडांश्च बाधांश्च जरामरणयातनाः ।
प्रातिकूल्यादिविघ्नांश्च नश्यन्तु सद्गुरुः सदा ॥ १३ ॥
भूतप्रेतपिशाचांश्च वेतालब्रह्मराक्षसान् ।
शाकिनिडाकिन्यादींश्च नश्यन्तु स्वामीसमर्थः ॥ १४ ॥
महापापांश्च घोरांश्च ब्रह्महत्यादिदुर्धरान् ।
समूलान्पातकान्नित्यं नश्यन्तु सद्गुरुस्तथा ॥ १५ ॥
स्वामी समर्थ तेजश्च रक्षतु माञ्च सर्वदा ।
भूत्वा तत्कवचं मे च अभेद्यं तत्भवेत्सदा ॥ १६ ॥
वज्रकवचमिदं वै च यः पठेद्भक्तिमान्नरः ।
तीर्त्वा च संकटान्घोरान् सर्वतः सुखमाप्नुयात् ॥ १७ ॥
प्रतिदिनं पठेद्यो भक्तो भावपूरितचित्ततः ।
संसारसागरं तीर्त्वा भुक्तिं मुक्तिञ्च विन्दति ॥ १८ ॥
साधको यो यदिच्छेच्च गुरुभक्तो हि वर्तते ।
प्रसन्नो तस्मिन्हि भूत्वा च कृपालुर्भवति शीघ्रतः ॥ १९ ॥
स्वामीसमर्थप्रसादश्च कवचं जानयेद् बुधः ॥
सच्छिष्याय भक्ताय दातव्यं न च कर्हिचित् ॥ २० ॥
अतिदिव्यं कवचं श्रेष्ठं दत्तं मे स्वामिनाऽधुना ।
अहं ददामि शिष्याय प्रकाशाय प्रियाय च ॥ २१ ॥

इदं कवचं तस्मै वै शुभं करोति सर्वदा ।
सर्वेषां मंगलं भूयात् दिव्यं कवचमेव च ॥ २२॥
सदिच्छां प्रकटीकृत्वा समापनं करोम्यहम् ।
नत्त्वा स्वामीसमर्थं च नमामि श्रीधरं गुरुम् ॥ २३॥
प्रकाशस्य निमित्तेन प्रकाशितमिदं स्तवः ।
तर्हि तत्प्रति चाशींश्च ददामि च पुनः पुनः ॥ २४॥
अक्कलकोटवासी च स्वामीसमर्थ सद्गुरुः ।
भूयात् सर्वमांगल्यं सर्वेषामिति प्रार्थये ॥ २५॥
॥ इति सुव्रतविरचितं स्वामीसमर्थवज्रकवचं समाप्तम् ॥

Composed by Prithviraj Bhalerao
Encoded by Anand Kulkarni

---

Please send corrections to sanskrit@cheerful.com
Last updated September 1, 2004